# संस्कृतवार्ता:

दिनाङ्क :-  19/03/2025                                    सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- केन्द्रीयप्रशासनेन अल्पमूल्यात्मकानां यू.पी. आई. इति माध्यमेन दीयमानानां धन-दानादानानां प्रोत्साहनाय पञ्चदशशतकोटि-रूप्यकाणां प्रोत्साहन योजना स्वीकृता। असमप्रदेशस्य नामरूप इत्यत्र उर्वरक संयंत्रस्य स्थापनाय स्वीकृतिः च प्रदत्ता।
- भारतदेशः पञ्चत्रिंशदुत्तर-द्विसहस्रत्तमवर्षं यावत् अन्तरिक्ष-स्टेशन इति नाम्ना स्वकीयम् अन्तरिक्ष-स्थानकम् भवेत् इति धिया योजनां निर्मापयन्नस्ति, चत्वारिंशदधिक-द्विसहस्रवर्षं यावत् भारतीय-अन्तरिक्षयात्री चन्द्रमसि भविष्यति च।
- नासा इत्यस्य अन्तरिक्षयात्रिणौ सुनीता-विलियम्स, बुच-विल्मोर इत्येतौ नवमासम् यावत् अन्तरिक्षक्षेत्रे समाप्य अद्य प्रातः स्पेस-एक्स-क्रू-ड्रेगन इत्यस्मिन् अन्तरिक्षयाने समारुह्य धरायां प्रत्यावर्तितौ।
- राष्ट्रपति-द्रौपदीमुर्मु प्रधानमन्त्री नरेन्द्र मोदी च सुनीतायाः प्रत्यावर्तनाय नासा इत्यस्मै वर्धापनानि अयच्छताम्।
- अद्य भारत-मालदीव-देशयोः पादकन्दुकदले भारतस्य शिलोंग इति क्षेत्रे अन्ताराष्ट्रिय-द्वन्द्वं क्रीडतः।

---------------------------------------------

राज्यसभा स्वास्थ्यचर्चा

केन्द्रीयप्रशासनेन अल्पमूल्यात्मकानां यू.पी. आई. इति माध्यमेन दीयमानानां धन-दानादानानां प्रोत्साहनाय पञ्चदशशतकोटि-रूप्यकाणां प्रोत्साहन योजना स्वीकृता। असमप्रदेशस्य नामरूप इत्यत्र उर्वरक संयंत्रस्य स्थापनाय स्वीकृतिः च प्रदत्ता। इति राज्यसभायां स्वास्थ्यमन्त्रिणा जगत्प्रकाशनड्डा इत्यनेन प्रोक्तम्।

---------------------------------------------

## लोकसभा-जितेन्द्र-अन्तरिक्षम्

भारतदेशः पञ्चत्रिंशदुत्तर-द्विसहस्रतमवर्षं यावत् अन्तरिक्ष-स्टेशन इति नाम्ना स्वकीयम् अन्तरिक्ष-स्थानकम् भवेत् इति धिया योजनां निर्मापयन्नस्ति। सर्वाः अपि योजनाः यदि सुचारुतया ससमयं सम्पन्नाः भविष्यन्ति तर्हि चत्वारिंशदधिक-द्विसहस्रवर्षं यावत् भारतीय-अन्तरिक्षयात्री चन्द्रमसि भविष्यति। इति अद्य प्रधानमन्त्री-कार्यालय- राज्यमन्त्री डॉ. जितेन्द्रसिंह: लोकसभाया एकस्य पूरक प्रश्नस्योत्तरे अवदत्।

श्रीसिंहेन प्रोक्तम् यत् चन्द्रयान-फोर इत्येतत् द्वाभ्यां प्रक्षेपणयनाभ्यां प्रक्षेपयिष्यते अपि चास्मिन् घटकपञ्चकम् भविष्यति। गगनयानाय चिताः चत्वारः यान्त्रिणः जनसम्पर्कात् दूरं किमर्थं स्थापिताः सन्तीति प्रश्नस्योत्तरे श्रीजितेन्द्रसिंह: उक्तवान् यत ते एतदर्थं जनसम्पर्कात् वारिताः सन्ति, यतो हि तेषां चित्तवृत्तयः नियन्त्रिताः स्युः, येन तेषां सम्पर्कः तादृशेभ्यः वस्तुभ्यः गतिविधिभ्यः वा न भवेत् येन तेषां चित्तवृत्तयः विचलिताः भवितुं शक्नुवन्तीति। तेनोक्तं यत् वर्षान्तं यावत् एकया महिला - रोबोट इत्यनया साकं गगनयानस्य परीक्षणोद्गमनं समारप्स्यते।

---------------------------------------------

## अन्तरिक्षयात्रिणां पुनर्वासः

नासा इत्यस्य अन्तरिक्षयात्रिणौ सुनीता-विलियम्स, बुच-विल्मोर इत्येतौ षडशीत्यधिक-द्विशतदिनानि यावत् अन्तरिक्षक्षेत्रे समाप्य अद्य प्रातः स्पेस-एक्स-क्रू-ड्रेगन इत्यस्मिन् अन्तरिक्षयाने समारुह्य धरायां प्रत्यावर्तितौ। तयोः यानम् अन्यैः सहयात्रिभिस्समं अमेरिकायाः खात्यां पैराशूट्स इत्येतेषां सहयोगेन अवतरितम्। अनेनैव सह अन्तरिक्षयात्रिभिः सह नासायाः निकहेग रूसदेशस्य अलेक्जेण्डर-गोरबुनोव इत्येताभ्याम् अपि स्वकीया यात्रा समापिता। एतेषां समेषां धरायामपि जीवनं सुकरं सामान्यञ्च भवेदिति मत्वा पञ्चचत्वारिंशद्दिवसात्मकः पुनर्वासकार्यक्रमः समारब्धोऽस्ति।

---------------------------------------------

## प्रधानमन्त्री / सुनीता विलियम्स

प्रधानमन्त्रिणा नरेन्द्रमोदिना ते सर्वेऽपि अन्तरिक्षयात्रिणः वर्धापिताः प्रशंसिताश्च, सहैव हि तेन तेषामपि प्रशंसा कृता येषां सत्प्रयासैः अन्तरिक्षयात्रिणां सुरक्षिततया धराधाम्नि प्रत्यावर्तनं सुकरं जातम्। सामाजिक-प्रसारतन्त्र-जाले प्रसारिते सन्देशे प्रधानमन्त्रिणा उक्तं यत् सुनीता- विलियम्स इत्यनया सह क्रू-नाईन इत्यस्य अन्तरिक्षयात्रिभिः पुनरेकवारं सिद्धीकृतं यत् दृढतायाः वास्तविकं तात्पर्यं किम्भवतीति। अनन्त-अज्ञात-शून्यस्य सम्मुखे तेषां दृढसङ्कल्पः सर्वदैव लक्षशः जनान् सम्प्रेरयिष्यति। सुनीता विलियम्स इत्यस्याः भावनाः प्रयासाञ्च समुट्टङ्कयन् श्रीमोदी उक्तवान् यत् तया स्वकीये सम्पूर्णे जीवने वृत्तौ च एतत् उदाहरणत्वेन प्रस्तुतं यत् कथं तस्याः भावनाः सन्ति, कथञ्च सत्प्रयासैः सा सम्बलिता अस्तीति।

--------------------------------------------

राष्ट्रपतिः नासा

राष्ट्रपतिपदासीनया द्रौपदी-मुर्मु इत्यनया क्रू-नाइन इत्यभियानस्य धरायां कुशलतया प्रत्यावर्तनाय नासा इत्यस्य सर्वमपि दलं वर्धापनानि सन्ति प्रेषितानि। सामाजिक-सञ्चार-तन्त्र-जाले प्रसारिते एकस्मिन् सन्देशे राष्टर्पतिना प्रोक्तं यत् भारतस्य पुत्र्या सुनीता-विलियम्स इत्यनया, तस्याः सहयात्रिभिश्च स्वस्य दृढतायाः, समर्पणस्य, कथमपि पराजयं न स्वीकरिष्यामीति भावनायाः च परिचयो दत्तः।

--------------------------------------------

रायसीना-जयशंकरः

विदेशमन्त्री डॉ. एस.जयशंकरः अद्य नवदिल्ल्यां पञ्चविंशत्यधिक द्विसहस्रतमवर्षस्य रायसीना-संवादे राष्ट्रियसुरक्षायाः चिन्तेति विषयमधिकृत्य सम्बोधितवान्। वैश्विक-आर्थिक-रणनीतिषु परिवर्तनं प्रकाशयन् सः अवदत् यत् साम्प्रतिकं विश्वं राष्ट्रिय-सुरक्षायां ध्यानं दत्वा वाणिज्यिक-निर्णयान् स्वीकरोतीति यद्धि इतः पूर्वं नाभवत्।

डॉ. जयशंकरः आरेखितवान् यत् इदानीं देशाः केवलं व्यय-प्रभावशीलतायाः अपेक्षया सुरक्षित-विश्वसनीय-सहभागितायां प्राथमिकतायाः ध्यानं कुर्वन्ति। भारतस्य वाणिज्यिकविमर्शस्य चर्चां कुर्वन् सः अवदत् यत् भारतदेशः अधुना यूरोपीयसङ्घस्य, यूके, अमेरिकादेशैः सह त्रीणि बृहत्व्यापारसंवादेषु संलग्नः अस्तीति।

---------------------------------------------

लोकसभा -वैष्णव द्यूतम् :

सूचनाप्रसारणमन्त्री अश्विनी-वैष्णवः उक्तवान् यत् आभासीयमाध्यमैः सम्पद्यमानानां द्यूत-क्रियाकलापानां निवारणे महत्त्वपूर्णः परिष्कारः अभवत्, गतवर्षे सप्त-नवत्यधिकैकसहस्रं यावत् द्यूत-अन्तर्जालानि प्रतिबन्धितानि आसन्। अद्य लोकसभायां पूरकप्रश्नानाम् उत्तरं ददन् श्रीवैष्णवः अवदत् यत् केन्द्रं राज्यं च एतादृशानां क्रियाकलापानाम् निवारणाय मिलित्वा कार्यं कर्तव्यं भवति तथा च आन्तर्जालिकापराधसम्बद्धाः सर्वे विभागाः समन्वयेन कार्यं कुर्वन्ति।

श्रीवैष्णवः अवदत्, आन्तर्जालीय- नकारात्मकप्रभावानाम् विषये समाजे जागरूकता आगच्छतीति।

---------------------------------------------

राज्यसभा-आतङ्कवादः-

आतङ्कवादं विरुध्य शून्यसहिष्णुतायाः नीतिः सर्वकारेण स्वीकृतास्ति, येन देशे आतङ्कवाद-घटनासु महती न्यूनता सञ्जातास्तीति,अद्य राज्यसभायाम् उत्तरं ददन् गृहराज्यमन्त्री नित्यानन्दरायः उक्तवान् यत् केन्द्रसर्वकारः देशात् आतङ्कवादस्य उन्मूलनार्थं कठोराचरणं कुर्वन् अस्ति।

श्रीरायः अवदत् यत् देशात् बहिः अपि आतङ्कवादसम्बद्धानां घटनानां क्रियाकलापानाञ्च अन्वेषणार्थं अधिकशक्तियुतं राष्ट्रियनिरिक्षाभिकरणं सर्वकारेण सुदृढं कृतमिति। सः अवदत् यत् एन.आइ.ए. इत्याभिकरणं लंदन-नगरस्थे भारतीय-उच्चायोगे सैन फ्रांसिस्को इत्यत्र भारतस्य महावाणिज्य दूतावासे च जाताक्रमणयोः संबंधित घटनानाम् अन्वेषणं कुर्वदस्ति।

---------------------------------------------

पंजाब कृषकोपवेशनम्

पञ्जाब-प्रान्तस्य कृषकाणाम् उपवेशनम् सम्पन्नम् उपवेशनमिदं चण्डीगढ इति केन्द्रशासित-प्रदेशे केन्द्रराज्यसर्वकारयोः प्रतिनिधीनां मध्ये होरात्रयात्मकमासीत्। संयुक्त-किसान-मोर्चा इति अद्य

किसान-मजदूर-मोर्चा इति संघयो: निर्मातॄणां अष्टाविंशतिः कृषक-संघानां प्रतिनिधिभिः समं केन्द्रीयकृषिमन्त्री शिवराजसिंह-चौहान इत्यस्य चर्चा जाता। उपवेशनेऽस्मिन् वाणिज्यमन्त्री पीयूषगोयल:, उपभोक्तृप्रकरणानां मन्त्री प्रह्लादजोशी च उपस्थितौ आस्ताम्।

---------------------------------------------

क्रीडावार्तासु

अद्य भारत-मालदीव-देशयो: पादकन्दुकदले भारतस्य शिलोंग इति क्षेत्रे अन्ताराष्ट्रिय-द्वन्द्वं क्रीडत:।

।। इति वार्ता:।।